अथ पंचक्रोशीमाहात्म्यं प्रारभ्यते॥

श्रीगणेशायनमः॥ ॥श्रीकपिलउवाच॥एवंसिद्धाःकाशिकायांवसेद्यःसर्वैर्द्दुमैःसंयुतःसोतिवंद्यं॥त
स्माद्भूमीःसततंसिद्धिभूमौसंसेव्याःस्युःपापकंनास्यमत्र॥१॥येयेधर्मामानवैःसंप्रयुक्ताःकाश्यां
तेतान्मोक्षसिद्धिंनयंति॥तस्मात्सिद्धिःसाधयेदात्मकार्यैसद्भिःशास्त्रैःश्रद्धयात्यागयोगैः॥२॥का
श्यांकृतानांपापानांपुण्यानांवासमृद्धयः॥भवंतिसततंनूनंसुक्षेत्रेह्युप्तबीजवत्॥३॥सिद्धाऊचुः॥दे
वदेवारविंदाक्षसांख्ययोगप्रवर्तक॥कथंमुच्येतमनुजःकाश्यामेवकृतैरघैः॥४॥मोक्षंप्राप्नोतिचक
थंकथंवाजीवनेसुखं॥आनंदकाननेह्यस्मिन्कथमानंदभाग्भवेत्॥५॥कपिलउवाच॥इदमेवपु
राष्टृष्टःपार्वत्याभगवान्भवः॥पापनाशंधर्मवृद्धिरविलंबेनमोचनं॥६॥पार्वत्युवाच॥दीनानाथैकश
रणदेवदेवदयानिधे॥पाहिलोकान्वदेदत्तान्सूक्तैःपापप्रणाशनैः॥७॥आगत्यशीघ्रंयेप्राज्ञाःकाशीं
तीर्णाःक्षणेनते॥येतुस्थित्वासुकृतिनस्तेपिशीघ्रंपरंगताः॥८॥पापंकृत्वामृतायेचतेषांमुक्तिःकथं
भवेत्॥कृपयादेवदेवेशप्रायश्चित्तमशेषतः॥९॥महादेवउवाच॥शृणुपार्वतिवक्ष्यामियज्ञोप्यं

ममसर्वतः॥ पुण्यवृद्धिःपापवृद्धिःकर्त्तव्यंकाशिवासिभिः॥१०॥ नकोपिदृष्टोमनुजोविनापापंश
रीरभाक्॥ कुर्वन्नपिमहापुण्यंपापंसंस्कारतस्स्मरेत्॥११॥ देहःस्वकार्यंकुरुतेइंद्रियाणिस्वक
र्मसु॥ प्रवर्त्तंतेबलादेवमनःकेननिवार्यते॥१२॥ प्रायश्चित्तानिकिंतानियैःपुनःसंप्रवर्त्तते॥ मनः
शरीरादिपुनःप्रायश्चित्तंनतत्भवेत्॥१३॥ प्रायश्चित्तत्रयंसूक्ष्ममनुभूतंमहात्मभिः॥ ब्रह्महत्या
दिपापानामन्यपापकृतांतुकिं॥१४॥ काश्यामपिवसन्जंतुर्यदिपापकृदत्रहि॥ प्रायश्चित्तत्रयं
कृत्वासद्योमुच्येतबंधनात्॥१५॥ देव्युवाच॥ आश्चर्यमेतद्भगवन्त्वयानिगदितंविभो॥ वाराण
स्यांकृतैःपापैर्मुच्यतेयन्नरःसकृत्॥१६॥ कृपयातथैतद्ब्रूहिकलावपिहिनिष्कृतिः॥ कलौकलुष
चित्तानांक्वधर्मःक्वपरंपदं॥१७॥ श्रीभगवानुवाच॥ शृणुलोकेहितेदेविलोकानामुद्धृतिंपरां॥ प्रा
यश्चित्तत्रयंवच्मिकाश्येनःसंदिधस्वतां॥१८॥ वापीकूपतडागादिजीर्णोद्धारकृतांनृणां॥ प्रभवेन्न
महत्पापंकाश्यामपिकृतंहियत्॥१९॥ आपोनाराइतिप्रोक्ताआपोवैनरसूनवः॥ अयनंतस्यताःपू

वैतेननारायणःस्मृतः॥२०॥तेनेश्वरेणहरिणाकृतंपापप्रणाशनं॥यत्रयत्रजलंकास्यामुद्धरेत्सुकृ
तीनरः॥२१॥तत्रतत्रमुदायुक्ताःपितरःपर्युपासते॥कास्यांरुद्रमयाःसर्वेजंतवःश्रुतिनोदिताः॥२२॥ते
पिबंतिजलंयत्रतडागादौतृषार्दिताः॥तत्पुण्यंनमयावक्तुंशक्यंवर्षशतैरपि॥२३॥आसीद्धर्मपथोना
मवणिक्कश्चित्सुधार्मिकः॥कुलस्तंभस्यवापव्यैतेनखातःप्रखानितः॥२४॥तत्रगावोमनुष्याश्चपिबंत्यं
भस्तृषार्दिताःप्रत्यहंतत्सुकृतंवर्धतेचंद्रमायथा॥२५॥सूक्ष्मधर्मोमनुष्याणांदुर्लभोविषयात्मनां॥का
लेनमहतातत्रदुर्भिक्षकरपीडितः॥२६॥दरिद्रतामवापोच्चैःब्रह्मर्णकृद्भूततः॥ब्राह्मणेनधृतःक्वापि
स्वधनार्थंऋणीवणिक्॥२७॥मह्यंदेहिदुष्टेतिपरिक्षिप्तःपुनःपुनः॥ब्राह्मणेनवणिग्धर्मपथोदैन्यमुपा
गतः॥२८॥इदानींनधनंकिंचिदस्तिब्राह्मणसत्तम॥ब्राह्मणउवाच॥शतंत्रयपरीमाणंनिष्कानांहेमदेहित
त्॥२९॥नोचेत्तडागोमन्नाम्नाप्रथितस्त्वयापरं॥त्वत्कारितोबहुधनैर्गंभीरोनिर्मलोदकः॥३०॥विमुक्तो
भवदत्वाश्रुतडागंलोकसन्निधौ॥धर्मपथउवाच॥अवश्यंमोचयत्तुमामृणाच्छीघ्रंभवान्प्रभो॥३१॥क्र

पतिः॥ ४१॥ द्विजाऊचुः॥ आनंयंतुमनुष्यायेसमर्थामहतींशिलां॥ इतिश्रुत्वासुवलिभिर्वणिक्धर्मपथः
क्षणात्॥ ४२॥ आनयामासविपुलांदृष्ट्वातुब्राह्मणास्तुतां॥ निक्षिप्यतांतडागेत्रनिमग्नास्तुक्रणावधि॥
४३॥ यावन्मनुष्यैःपशुभिःपथिकैश्चापितज्जलं॥ पीतंतद्भूनपर्याप्तमुन्मज्जनुनतत्क्षिपं॥ ४४॥ इत्युक्त्वास
शिलाविप्रैःपातितातज्जलेशुभे॥ चक्रुःशिवकथांपुण्यांकाशिवासिजनैर्वृतां॥ ४५॥ क्षणांतरेगौस्तृषिता
सवत्सासमुपागता॥ तयापीतंजलंतत्रसाभवच्छृणुपार्वति॥ ४६॥ साशिलाऋषिमुख्यानांप्रभावाज्जल
मध्यतः॥ जलोपर्यभवच्छीघ्रंपश्यतांसर्वदेहिनां॥ यथातुंबीफलंशुष्कंगच्छतीतीततस्ततः॥ तथालघु
तराजातापश्यधर्मस्यगौरवं॥ ४८॥ सर्वेलोकास्तुतंदृष्ट्वाप्रशंसुर्ऋषिपुंगवान्॥ अपूर्वंदर्शितंपुण्यमृषि
भिःसुमहात्मभिः॥ ४९॥ अहोनदृष्टमस्माभिःकदाचित्सुमहाद्भुतं॥ पुण्यंसुसूक्ष्मंनजानंतिसर्वेलोकाःकथं
चन॥ ५०॥ महादेवउवाच॥ काश्यांकिंचिज्जलंयेस्तुसंपादितमनामयं॥ नतेषांपापलेशोपिकाश्यामपि
कृतंप्रिये॥ ५१॥ परंतुसावधानैर्हिकर्तव्यःसुजलाशयः॥ अपराधोनभवतिमहापापकृतस्त्वयः॥ ५१॥ देवु

णयुक्तास्त्रियंते चेत्पच्यंते नरकार्णवे॥ जनाश्चोरजनस्यापि गृहीत्वा धनमत्रतु॥ ३२॥ नरके घोरे पच्यंते
ऋणयुक्ता नराधमाः॥ किंपुनर्ब्राह्मणस्याणुमात्रं हृत्वा मृतो हि यः॥ ३३॥ ब्राह्मणा यद्वदिष्यंति तत्कर्तास्मि न सं
शयः॥ स तु वार्द्धुषिको गत्वा मेलयित्वा द्विजान् बहून्॥ ३४॥ आनयामास देवेशि पत्र धर्मपथो वणिक्॥
द्विजैः पृष्टो वणिग्विप्रो कथ्यतां ह्वानकारणं॥ ३५॥ यदर्थं वयमाहूतास्तच्छ्रुत्वोपदिशामहे॥ धर्मपथ उवा
च॥ अहं ऋणी ब्राह्मणस्य निष्कानां च शतत्रयं॥ ३५॥ गृहीतं व्यवहारार्थं देवान्नष्टं शनैः शनैः॥ असौ निनि
यमेनाशु सुवर्णस्य तडागजं॥ ३६॥ सुकृतं प्रार्थयत्येव न हि चार्पय यो च्यतां॥ यथा कथंचिन्मुक्तः स्यां न तथा
शीघ्रं विधीयतां॥ ३७॥ ब्राह्मणा ऊचुः॥ साधूक्तं धर्मपथ ते ऋणभीत्या महामते॥ सुविचारितमस्माभिर्वक्तव्यं सु
दृढं खलु॥ ३८॥ अस्मान्नाहयपोधृष्टो न श्रोष्यति वचो हि नः॥ शिरस्तस्य विशीर्णः सन् पतिष्यति न संशयः॥
३९॥ ब्राह्मण उवाच॥ ब्राह्मणानां वचो ग्राह्यं मया सर्वात्मना हितं॥ अत्र प्रमाणं भगवान् विश्वेशः पार्वतीप
तिः॥ ४०॥ धर्मपथ उवाच॥ यद्भूमिदेवैर्वक्तव्यं तन्मया ग्राह्यमेव हि॥ अत्र प्रमाणं भगवान् विश्वेशः पार्वती॥

वाच॥ जलाशयेकृते देवकारिते वा महात्मभिः॥ कोपराधः पतेद्यत्र तन्ममाचक्ष्व शंकर॥५२॥ महादेव उवा
च॥ काश्यां तिलेतिलेलिंगं काश्यां तीर्थं पदे पदे॥ खननं काशिभूमेस्तु दुर्घटं भाति पार्वति॥५३॥ जीर्णोद्धारं च
ये कुर्युस्ते निःसंदेहा महाधियः॥ स्वयं कृतं प्रयत्नात्तादितदनेकफलप्रदं॥५४॥ ततोप्यधिकधर्मादिजनकं।
जीर्णमुद्धृतं॥ न तत्र लिंगपीडास्यान्न तीर्थखननं भवेत्॥५५॥ अतो जीर्णोद्धृतिः कार्या निरवद्या महाफ
ला॥ जीर्णोद्धारं प्रकुर्वंति तेषां विश्वेश्वरः स्वयं॥५६॥ काश्यां कृतानां पापानां मूलोद्धारं करोति हि॥ यो बु
द्धिपूर्वं प्रकरोति पापं न तस्य काश्यां मरणं प्रसिध्यति॥५७॥ मृतोपि निर्वाणसुखं न वाप्नुयात् यावत्पिशा
चत्वमवाप्नुयान्नरः॥ देव्युवाच॥ पिशाचत्वस्य मर्यादां ब्रूहि पापस्य चानघ॥ यातना पाश्वपद्रूपं बुध्यवु।
द्धिकृतं च यत्॥५८॥ भगवानुवाच॥ भवानि भवभीतानां नृणां निस्तारकारणं॥ दृष्टं दृष्टं यत्कृप्रवक्ष्यामि
भीतानामभयप्रदं॥५९॥ काश्यामागत्य सततं श्रोतव्या काशिसत्कथा॥ न विना श्रवणं पुण्यं पापं वा वे
त्ति कश्चन॥६०॥ विदित्वा पतते भूयो निस्ताराय परायच॥ सर्वलोकेषु वेदेषु विचारः श्रवणाद्भवेत्॥६१॥

पं॰मा॰ श्रुतिस्मृतिपुराणेषुसर्वशास्त्रेषुपार्वति॥ काशीब्रह्मेतिविख्यातातत्रब्रह्मप्राप्यतेत्रहि॥ ६२॥ तस्मात्काशी
४ गुणान्सर्वेतत्रतत्रवदंतिहि॥ श्रुत्वापिपापनिरतास्तान्हन्त्यात्कालभैरवः॥ ६३॥ संततंनिर्दयोभूत्वाया
वत्पापंसमाप्यते॥ महापातकसंयुक्तास्त्रिंशब्दसहस्रकं॥ ६४॥ प्रत्येकंप्राप्नुवंत्येवयातनांकालभैर
वीं॥ क्षुद्राणिपापानितुसंग्रहेणभवंत्यवश्यंतुमहांतितानि॥ यथाहिरण्यंकणशोपिसंचितंनिष्कादिवृ
द्धिंभवतेभवानि॥ ६५॥ सर्वोपिलोकःकुरुतेप्रवृत्तिंप्रवृत्तिभाजांखलुपातकंस्यात्॥ अतःकियज्जीविन
माकलय्यनिवृत्तिरंगीक्रियतेमुमुक्षुभिः॥ ६६॥ वाक्पातकंमानसकायिकेचप्रवृत्तिमार्गेनिरतस्यावश्यं
॥ भवत्यसौयद्यपिसावधानस्तथापिसंस्कारवशादुपेति॥ ६७॥ अतःप्रवृत्तिंपरिहाययसेव्यावारा
णसीसाधुजनैःसुखार्थिभिः॥ नचेद्यथेष्टाचरणेनयत्फलंतद्भोगकालेप्रकटीभविष्यति॥ ६८॥ लौकि
कायातनाःकैश्चित्सोढुंशक्यानपार्वति॥ किंपुनःकालराजेनकृतास्तीव्रातिदुःखिताः॥ ६९॥ नित्यं रा॰
कृतानांक्षुद्राणांपापानांनित्यकर्मणां॥ नाशःसंपाद्यतेसद्भिर्गंगास्नानादिभिर्नृभिः॥ ७०॥ त्रिंशद्वर्षस ४

हस्राणित्रिंशद्वर्षशतानिच॥ पच्यतेदुःखसंघोघैःकालराजेनसादरं॥७१॥ अतःश्रुत्वातडागादिजी
र्णोद्धारंप्रकल्पयेत्॥ क्षेत्रेकृतानांपापानांप्रायश्चित्तंगतंमम॥७२॥ असावधानाद्धिनरात्मनोवैकुर्वं
तिपापानिकिमत्रचित्रं॥ पठंतिजानंतिवदंतिनित्यंदासुपंडितास्तेपिविषाग्निमध्यगाः॥७३॥ भवंतिदुः
खान्यनुभूयपश्चात्तापेनपापेनचदह्यमानाः॥ पुनःपुनर्विषयासक्तचित्ताःशास्त्रंगुरुंदेवमथोनुकाशीं
॥७४॥ न्यकृत्यभूयोविषयेषुबुद्धिंकुर्वंतिसत्यांननुकाशिकायां॥ व्यवहारोपितैस्त्यैकःप्रसिद्धः
सर्वजंतुषु॥ मृत्तिकापरिवर्तेनहिरण्यंप्राप्यतेनहि॥७५॥ अहोकाश्यांकौतुकंतुपश्यपार्वतिसर्वदा॥
गृहीत्वानरकंदेहंप्रददात्यमृतंपुनः॥७६॥ श्रुत्वाध्यायमिमंपुण्यंनदुःखैरभिभूयते॥ सुखवासश्चभ
वतिकाश्यांसर्वजनप्रियः॥७७॥ इतिश्रीब्रह्मवैवर्तेपंचक्रोशीमाहात्म्येप्रथमोध्यायः॥१॥ ॥श्रीदेव्यु
वाच॥ देवदेवमहादेवभक्तानामभयप्रद॥ काशीवासःसुगहनःपापिनांधनलोभिनां॥१॥ विषयास
क्तमनसांनसुखायकदाचन॥ सुखायसर्वलोकानांप्रवृत्तिःकथिताकलौ॥२॥ विषयैःपरिपुष्टानांजीव

पं·मा· तेनान्यथा भवेत्॥ प्रायश्चित्तं नरं देव वदस्व परिमन्यसे॥ ३॥ प्रायश्चित्तविहीनस्य पातना जायते
५ ध्रुवं॥ विशेषमिदीनान्मनुजान्दृष्ट्वा शास्त्रपराङ्मुखान्॥ ४॥ तानप्युद्धर देवेश शठान्स्वेच्छापरिग्रहा
न्॥ महादेव उवाच॥ साधु पृष्टं त्वया देवि सेत्रपापकृतां नृणां॥ ५॥ निस्तारः स्याद्यथा मे स्तु प्रायश्चित्ते
न येन हि॥ प्रायश्चित्तविहीनानां यातना बहुदुःखदा॥ ६॥ तस्मात्सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत्॥
जैगीषव्यो मुनिश्रेष्ठस्तपस्वी मत्परायणः॥ ७॥ तेन दृष्टोहमागत्य शिष्यार्थे तद्दयालुना॥ स्तुत्वा मां वैदि
कैः सूक्तैः स्मार्तैः पौराणिकैः शुभैः॥ ८॥ प्रसन्नं मां मुनिर्ज्ञात्वा वचनं चेदमब्रवीत्॥ जैगीषव्य उवाच॥ किं
विधित्सुका मोहं देवदेव दयानिधे॥ ९॥ आज्ञया प्रवदाम्यज्ञः सर्वज्ञस्य तवाग्रतः॥ मया चोक्तो वदस्वे
ति त्वं मद्भक्तः प्रियः शुचिः॥ १०॥ अदेयं तव नास्त्यद्य निर्वाणाद्यपि याच्यतां॥ यस्तु मां सर्वभावेन भजते को
पि मानवः॥ ११॥ न तस्यादेयमस्तीह त्रैलोक्ये सचराचरे॥ जैगीषव्य उवाच॥ अयं मम दुराचारः शिष्यः पा राम:
परतः सदा॥ १२॥ काश्यां वसन्नपि मदात्कृत्याकृत्यं न वेत्ति यत्॥ शिक्षितो बहुधास्माभिर्बहुधा ताडितो ५

पं·मा· रश्रींततोपि॥ तत्रापिनस्थासुचिरंधृतव्रतोनशर्मलेभेसुकृतैकसाध्यं॥२४॥ ततःश्रीशैलमगमद्द्रष्टुंस्वा
६ मिनमव्ययं॥ स्थितमग्रेविभुंस्कंदंददर्शेनतथात्मजं॥२५॥ तत्रैववसतिंचक्रेतपःशुद्धंचकारच॥ का
श्यांकृतानांपापानांशुद्धयेधर्मवृद्धये॥२६॥ एवंबहुतिथेकालेह्यगस्त्यःकुंभसंभवः॥ काशीविरहदुःखे
नविह्वलःसमुपागतः॥२७॥ हाकाशिकाशिहाकाशिकाशिहेकाशिकेतिच॥ बहुधाव्याकुलोभूत्वापठन्स्कंदमु
पागतः॥२८॥ वारंवारंश्रवणतःकाशीनामामृतस्यहि॥ मयादृष्टःकाशिवासीह्यगस्त्यःस्कंदसवच॥२९
नानातपोभिरत्युग्रैर्नमयास्कंददईसतः॥ काशीनामानलेनाशुदग्धपापोहिदृष्टवान्॥३०॥ इतिमामुक्तवा
न्पूर्वेपुनःपृष्ठोमयात्वयं॥ पुनरूचेतपोःशुद्धंसंवादंकाशिसंमतं॥३१॥ अगस्त्यमागतंदृष्ट्वास्कंदःप्रीतम
नाभवत्॥ स्कंदउवाच॥ आगच्छगच्छमांशीघ्रंपरिष्वजमहामुने॥३२॥ काशिकाविरहात्त्वांतुजानेव्याकु
लमानसं॥ ज्ञानिनामपिधीराणांयोगिनांसुतपस्विनां॥३३॥ काशीविरहजंदुःखंबाधतेविदुषांकिल॥ राम·
जडानांदेहगेहादिप्रीतियुक्तमनोधियां॥३४॥ अन्यप्रदेशवत्काशीभातिनित्यंदुरात्मनां॥ त्वंकाशीवास ६

पिच॥१३॥ परदारपरद्रोहरतः परधनापहृत्॥ पिशुनः पापनिरतो वेश्यागृहनिवासकृत्॥१४॥ पि
तृमातृगुरुद्रोही हि विप्रमित्रध्रुगेव च॥ किं बहूक्तेन देवेश पापनिर्वचनं मया॥१५॥ न शक्यते लज्जया स्व
कर्तुर्यद्ब्राह्मणोह्यसौ॥ मया निष्कासितः पाप आश्रमात्स्वात्ततो गतः॥१६॥ किंचित्किंचिच्चेष्टितं हि ज्ञा
त्वा श्रुत्वापि शिक्षितः॥ न करोति यदा किंचिच्छिक्षितं निंदितस्स्वयं॥१७॥ तदा वाग्व्यवहारोपि त्यक्तः सर्वा
त्मना मया॥ मत्सन्निधौ विनयवान्वेश्याचारो बहिः सदा॥१८॥ इति पौरमुखाच्छ्रुत्वा चेष्टितं तस्य दु
र्मतेः॥ मत्सन्निधानाद्गच्छ त्वं नो चेच्छप्स्यामि दुष्कृत॥१९॥ मतः पठित्वा शास्त्राणि धर्मज्ञानमपानि
च॥ करोषि नित्यं तत्कर्म येन लोकः पराङ्मुखः॥२०॥ बहुधा सर्वलोकेभ्यः श्रुत्वा दुर्विनयं तव॥ त्यक्तो
मया यथेच्छं त्वं गच्छ वा तिष्ठ वाधुना॥२१॥ इत्युक्तः स मया शिष्यो लज्जितः पापकृत्तमः॥ गंतुं मतिं
स्वां कृतवान् विहायान्यत्र काशिकां॥२२॥ काशीं परित्यज्य गतो विदूरं विंध्याद्रिकूटं समवाप्य चायं॥ तप
श्चचाराशुविशुद्धिकारणं वर्षत्रयं पत्रतृणादिभुक्परं॥२३॥ त्यक्त्वाद्रिकूटं च ततः प्रयातो गोदावरीं भीम

तत्वज्ञः शंकरार्चेनतत्परः॥ ३५॥ देवैः स्वकार्यनिरतैः कर्मरूपैर्विवासितः॥ काश्यांवसतियःकश्चि
त्काशींपश्यतियश्चहि॥ ३६॥ काशींस्मरतियःकश्चित्सपूज्योममसर्वदा॥ इत्युक्त्वापूजितस्तेनस्वामि
नामुनिसत्तमः॥ ३७॥ दत्वाचमनपानादिसर्वंपप्रच्छकुंभजं॥ स्कंदउवाच॥ वदस्वागस्त्यशुद्धात्मन्कं
कामंकरवामते॥ ३८॥ नचास्मद्दर्शनंप्राप्यशोचितुंत्वमिहार्हसि॥ अगस्त्यउवाच॥ जयदेवमहादेव
तनयानंददायक॥ ३९॥ वाराणसींप्राप्यपस्वयदितुष्टोसिषण्मुख॥ स्कंदउवाच॥ त्वंप्राप्स्यसिमहा
बुद्धेविघ्नांतेकाशिकांशुभां॥ नवापिकर्मगहनकाशींत्यक्त्वात्रतिष्ठसि॥ ४०॥ नज्ञायतेसूक्ष्मतरंहिकिं
चित्कर्मास्तिलोकस्यसुदुर्विभाव्यं॥ योगादियज्ञादितपोभिरुग्रैर्युक्तस्यतेसंप्रतिनास्तिकाशी॥ ४१॥ न
ज्ञायतेसूक्ष्मतरंहिपुण्यंनोचोऽपिकाश्यांतनुभृत्सदास्ते॥ देवादयोपिप्रभवंतिनैवस्थातुंक्षणंकाशि
कायांकुगर्वाः॥ ४२॥ विश्वेशविश्वेशशरण्यशंभोनान्यागतिस्त्वत्पदाब्जंविहाय॥ अनेकतापा
र्दितमानसानामस्माकमाकांक्षितदानदक्ष॥ ४३॥ त्वयाकृतेपंचजनतापशांतयेप्रपान्नतंपापभि

पं·मा तुंजनानां॥ नजातिशीलंसुकृतंचापिदृष्ट्वाज्ञानामृतं पच्छसि शंकर श्रुतौ॥४४॥ पुराणशास्त्रश्रु
७ तिधर्मशास्त्रविद्भिर्नृभिर्गदितंधर्मसाध्यं॥ आशामात्रंसाधनंनः कृपालोनोवाधर्मसांख्ययुक्तंत
पोवा॥४५॥ दीनानहंकारविकारहीनान् प्रयातिकाशीपतिरादृतात्मा॥ दीनानाथैकशरण्यंक्षेत्रंक्षेत्रज्ञ
धिष्ठितं॥ प्राप्यतेनिरहंकारैरागाद्यन्तविवर्जितैः॥४६॥ अगस्त्यउवाच॥ प्रमादाद्यदिसूक्ष्मंवास्थूलं
वापातकंनृभिः॥ कृतंकाश्यांतारकारेकथंतस्यास्तुनिष्कृतिः॥४७॥ स्कंदउवाच॥ अविमुक्तेकृतानां
तुपापानांकुंभसंभव॥ नदृष्टा नश्रुतावापिसाक्षाच्छिवमुखादपि॥४८॥ निष्कृतिंस्थूलसूक्ष्माणांशिवो
वेत्तिनचापरः॥ जैगीषव्यउवाच॥ इतिश्रुत्वास्कंदमुखाज्ज्ञानत्रासः स्वयंपुनः॥४९॥ सहसामामयाग
त्यप्रार्थयामासशंकर॥ मयापिनश्रुतादृष्टाक्षेत्रपापकृतांनृणां॥५०॥ निष्कृतिः शर्वसर्वेशब्रूहिचेदस्ति
शंकर॥५१॥ श्रीभगवानुवाच॥ जैगीषव्यमुनेत्वंमेभक्तः परमतापसः॥ श्रुतिस्मृतिपुराणज्ञः काशीत रामः
त्वविदांवरः॥५२॥ तवाग्रेकथयिष्यामिकाशीमाहात्म्यमुत्तमं॥ प्रायश्चित्तंनास्तिकिंचित्क्षेत्रपापकृतां १

नृणां॥५३॥ अस्तिनैकंसुगोप्यंहित्वदग्रेकथयाम्यहं॥प्रायश्चित्तंनान्यदस्तिमुक्तेज्ञानंविनाक्वचित्॥
५४॥ज्ञानंचदुर्लभंनृणांविषयासक्तचेतसां॥तज्ज्ञानंकाशिकायांहिसाक्षाद्भवतिदेहिनां॥५५॥देहाभिमा
निनांसौख्यंऋषिणामपिदुर्लभं॥ अज्ञानंदववनेज्ञानंआच्छादयतिदुर्मतिः॥५६॥स्वल्पेनाच्छाद्यतेज्ञानं
अंगुल्यासूर्यवत्खलु॥नस्मात्त्वमिवयोधीरस्सभवेत्ज्ञानभाजनं॥५७॥नजितेंद्रियतालोकेनवैराग्यंतथा
पिन॥विविक्तसेवासत्संगश्रवणाद्यपिदुर्लभं॥५८॥अन्यान्यपिमुमुक्षूणांसाधनानिमहांतिच॥भवं
तिकानिचिद्दृषेनचान्यत्राहतात्मनां॥५९॥भवंतिकाश्यांसफलानितानिमोक्षावसानानिसुसाधनानि
॥सदासदानंदवनेममालयेमयासहायेनसुसाधितानि॥६०॥काश्यांस्थितानांजंतूनांअविचारितक
र्मणां॥नसुखंनपराशांतिस्तस्मात्काश्यांविचार्यकृत्॥६१॥सुखमाप्नोतिपरमंपरांशांतिंप्रयातिहि॥प्रा
यश्चित्तविहीनानांनशांतिःकुत्रचिद्भवेत्॥६२॥किंपुनःकाशिकामध्येपापंकृत्वासुखीभवेत्॥ब्रह्म
हत्यादिपापानांप्रायश्चित्तंहिकाशिका॥६३॥काशिकायांकृतेपापेप्रायश्चित्तंनविद्यते॥प्रायश्चि॥

पं॰मा॰ तविहीनानांयातनानास्तिसुदारुणा॥६४॥ज्ञानस्वरूपाकाशीयंपंचक्रोशपरिमिता॥तस्याःप्रदक्षिणां
८ कृत्वानरःपापैःप्रमुच्यते॥६५॥ममब्रह्ममयंलिंगंआपातालात्समुत्थितं॥सत्यलोकोपरिगतमत्यति
द्दशांगुलं॥६६॥आजन्मसंचितैःपापैर्मुच्यतेतत्प्रदक्षिणात्॥क्षेत्रेकृतानांपापानांप्रायश्चित्तंनचेतर
त्॥६७॥प्रदक्षिणद्वयंकृत्वादशजन्मकृताद्घात्॥मुक्तोभवति पापात्मासद्योमोक्षमवाप्नुयात्॥६८॥त्रि
भक्त्यायदिकुर्याद्धिमोहात्पापंनतस्यतत्॥क्षेत्रंप्रदक्षिणीकृत्यभवेत्पापोहिविज्वरः॥६९॥प्रदक्षिणत्रयं
कृत्वापापंजन्मशतार्जितं॥विलयंचप्रयात्येतन्नात्रकार्याविचारणा॥७०॥यावज्जीवंवसेत्काश्यांप्रत्य
ब्दंसुप्रदक्षिणं॥कुर्यादेवनिरालस्योज्ञानंदसदनस्यहि॥७१॥प्रत्यब्दंयेप्रकुर्वंतिपंचक्रोशप्रदक्षिणं
॥जीवन्मुक्तास्तुतेज्ञेयानिःपापाःकाशिवासिनः॥७२॥ ॥इतिब्रह्मवैवर्तेतृतीयभागेपंचक्रोशीमाहा
त्म्येद्वितीयोध्यायः॥२॥ ॥श्रीमहादेवउवाच॥अत्रैवोदाहरंतीममितिहासंपुरातनं॥ऋषिःकूष्मा राम॰
डतनयोमंडपःसंगदोषतः॥१॥बालएवममक्षेत्रेपापंचरतिवेदवित्॥पित्रानिवारितोमात्राभ्रात्रा ८

श्रोत्रियवंशजः ॥२॥ असत्संगंत्यजतिनोविषयासक्तमानसः ॥परदारपरद्रव्यपरद्रोहरतः सदा॥
३॥ परापवादकुशलोवेदवादविवर्जितः॥ यथायथावयस्तस्यवृद्धिंप्रापसुदुर्मतेः॥४॥तथा
तथापापरतःसत्संगविमुखःसदा॥ अपवित्रैस्त्रिभिर्मित्रैःसंवृतोराजवेश्मनि॥५॥ प्रविष्टोधन
मादायचौर्येणसविनिर्गतः॥ वेश्यागृहेतन्निक्षिप्यतयासहदिवानिशं॥६॥रमतेमंडपोविप्रःपितृ
विश्रत्लनाशकः॥ कदाचिद्रममाणोसौतृषार्त्तःसमपद्यत॥७॥मंचाधस्तान्मपात्रस्थांगृहीत्वापीतवा
न्सुरां॥जलबुध्यापातकंतज्ज्ञातंतदविचारतः॥८॥किमेतद्धिमयापीतमिति वेश्यांसपृष्टवान्॥त
माहसामयानीतंसुरापात्रंसुसौख्यकृत्॥९॥त्वदर्थेसंभृतंमद्यंपुनःपिबसकृत्सकृत्॥इतिवेश्यावचः
श्रुत्वाधिग्धिक्पापंमयाकृतं॥१०॥वेश्यासंगेनमदिरापीताब्राह्मणसूनुना॥मंडपस्ततोमित्रद्व
यमासीत्सुदुःखितं॥११॥ वेश्यामुखात्सुरापानंतस्यश्रुत्वाजगर्हतुः॥ आदौविप्रस्ततोस्माकंसंगीपा
परतःसदा॥१२॥सुरापानंततोजातंततस्त्वंकिंकरिष्यसि॥ आच्छादयावःपापंतेसुवर्णदेहिनोबहु

पं·मा· ॥१३॥ तथेत्युक्त्वा पुनर्वेश्यागारं गत्वा प्रविश्य सः॥ सुवर्णं याचयामास ताडयामास तं च सा॥१४॥ वे
९ श्योवाच॥ वराक मम लीलायाः स्वादं ज्ञात्वापि मूर्खवत्॥ सुवर्णं याचसे किं त्वं लक्षमात्रं किमद्य मे॥१५॥
चुंबने चुंबने लक्षं बहुभ्यः प्राप्तमद्य वै॥ त्वं मयोपेक्षितो दीनो दत्त्वा नार्थयसे धनं॥१६॥ कामशास्त्रं त्वया
मूढ पठितं न कदाचन॥ यतो लीलां न जानासि मम कंदर्पमोहिनीं॥१७॥ गच्छ गच्छ सुखेनाशु यावद्दा
स्यो न संति मे॥ ताडयिष्यंति सर्वास्त्वां निर्लज्जं ब्राह्मणाधमं॥१८॥ वेश्यागृहात्ततस्तूर्णं क्षुधितोपि पिपा
सितः॥ पितुः सकाशमगमन्मातुश्चप्रियकाम्यया॥१९॥ दृष्ट्वा तौ दारकौ प्राप्तौ मित्रत्वे परिकल्पितौ॥ वदं
तौ देहि कनकं अस्मदंशं त्वमाशु वै॥२०॥ राज्ञो गृहाद्यदानीतं स्तेयेनास्माभिरुत्तमं॥ इति श्रुत्वा पिता
तस्य महादुःखसमन्वितः॥२१॥ उवाच दारकौ भीतः कौ युवां केन कर्मणा॥ कौ भवंतौ कथं संगः कृतो ने
न दुरात्मना॥२२॥ तद्धिरण्यं हि कुत्रास्ति यदर्थं वां व्यवस्थितौ॥ दारकावूचतुः॥ अहं कुविंदस्त्वत्पुत्रो मंड रामः
पो नापितस्त्वयं॥२३॥ मैत्री त्रयाणां संजाता दैवाद्दीपत्रपात्मिका॥ विभज्य भागाः सर्वैर्हि ग्राह्या इतिविधिः ९

कृतः॥२४॥ अनेन वेश्याभवने निक्षिप्तं रत्नमेव हि॥ स्तानप्रयच्छति मुने वेश्यावारविवादिनी॥२५॥ अतः
परं राजगृहं गंतव्यं वक्तुमेव हि॥ देहि द्रापय वास्माकं धनं शीघ्रं हि दुःखदं॥२६॥ नो चेन्नवाग्मजः साधो शूलप्रो
तो भविष्यति॥ रक्ष पुत्रं तथास्माकं स्वसात्मानमपि चानघ॥२७॥ कूष्मांड उवाच॥ आगच्छतम पासाई राजरा
जस्य सन्निधौ॥ पुत्रं गृहीत्वा गच्छामि शास्त्यर्थे धर्मतो यथा॥२८॥ राजभिः कृतदंडास्तु शुध्यंति मलिना नराः॥ अ
निर्वेशकृतः पापा गच्छंति नरकं मृताः॥२९॥ दारका वूचतुः॥ पुत्रं समर्पय मुने किमर्थं त्वं गमिष्यसि॥ राजाग्रं
विवादार्थं न गंतव्यं कदाचन॥३०॥ कूष्मांड उवाच॥ भवत्सह न संबंधः इत्युक्त्वा नीयतां सुतः॥ नो चेदहं गमिष्यामि
राजवेश्म सुनिश्चितं॥३१॥ दारका वूचतुः॥ त्वया सह न संबंधो देहि मित्र द्रुहं शठं॥ अस्माभिरेव गंतव्यं त्वं ज्येष्ठ
स्तिष्ठ लज्जितः॥३२॥ कूष्मांड उवाच॥ पुत्र गच्छ द्विजश्रेष्ठ द्विजकृत्यं त्वया कृतं॥ प्रायश्चित्तं विधाया सुराज्ञा दत्तं न
चान्यथा॥३३॥ आगंतव्यं त्वया वत्स नो चेद्याहि यथासुखं॥ तावन्नाहं तव पिता न सुतस्त्वं ममाघवान्॥३४॥ ईश्वर उवा
च॥ जैगीषव्य मुनिश्रेष्ठ तेन विप्रेण मंडपः॥ समर्पितस्तयोः पुत्रस्नेहमुन्मुच्य दूरतः॥३५॥ धार्मिकाणां धनैः पुत्रैः

पं·मा· कलत्रैः किंप्रयोजनं॥धर्मसंग्रहशीलानां यतस्ते काशिवासिनः॥३६॥पुत्रो भ्राता पिता वापि यः कश्चित्पापमा
१० चरेत्॥त्याज्य एव स पापात्मा भवेत्संसर्गजाद्भयं॥३७॥तं नीत्वा तौ दूरदेशं ताडयामासतुः क्रमं॥स ताड्यमानो
मूर्छां तु प्राप मृत्युसमां मुने॥३८॥मृतोयमिति चोत्सृज्य ययतुस्तौ विषण्णवत्॥पश्चात्तापेन संयुक्तावसिसं
गमसन्निधौ॥३९॥त्यक्त्वा विप्रसुतं भीतौ गतौ सिद्धेश्वरालयं॥तत्रोषित्वा तु तां रात्रिं दुःखितौ सुपितौ भृशं॥४०
॥पश्चात्तापपरीतौ तु पुनरन्वेषितुं गतौ॥मृतो वा जीवति तु वा ज्ञात्वा देशं त्यजावहे॥४१॥यावद्विचारणपरा
वागतावसिसंगमे॥तावद्द्विजसुतो भीतो गतमूर्छः प्रतस्थिवान्॥४२॥पंचक्रोशात्मकस्यैव शिवलिंगस्य
तद्दिने॥प्रदक्षिणं प्रकुर्वंति शिवमाहात्म्यवेदिनः॥४३॥क्षेत्रप्रदक्षिणकृतां तत्संगेन विनिर्गतः॥तस्मिन्दिने
कर्दमेशसंन्निधौ यात्रिणः स्थिताः॥४४ सोपि तत्र स्थितो विप्रो मंडपो मंडपोभवत्॥रात्रौ जागरणं तेन कृतं नृत्यंगि
वाद्यतः॥४५॥सर्वैः प्रोत्साहितः साधु साध्विति साधिति॥अयं परमशैवस्य कूष्मांडस्य तु मंडपः॥४६॥ रामः
पुत्रः शिवव्रतधरः साधु नृत्यति गायति॥ततस्तच्चेष्टितं कोपि तन्मध्ये वेनिन्वतः॥४७॥अत एवादृतः सद्भि १०

किंदृष्ट्वाबहिर्गतां॥सोऽपिचारुविचित्रांगःसर्वेषांसुमनोहरः॥४८॥बभूवसद्भक्तिपरःसत्संगेनद्विजोत्तमः
॥विचार्यमनसिह्येवंशिवभक्त्यासतांप्रियः॥४९॥ततोस्मिदुष्टोपिसदापंचपातकसंयुतः॥साधुवादःसतां
ज्ञेयोभवतिप्रत्यहंमम॥५०॥धनधान्यादिलब्धिश्चभोजनाच्छादनानिच॥अनायासेनलभ्यंतेऋजुमार्गेण
नित्यदा॥५१॥शिवेभक्तिःसतांतुष्टिर्देहपुष्टिर्निराकुला॥येनमार्गेणभवंतिसमार्गःसर्वसंमतः॥५२॥एवंविचार
यनसोथचंडिकांप्रापमंडपः॥तत्रपूजांभीमचंड्याःकृत्वाकाशिनिवासिभिः॥५३॥ब्राह्मणैर्भोजितःसम्यग्
दत्तशिवभक्तिकृत्॥उपविष्टास्ततोरात्रौदेव्याःपुरतआदरात्॥५४॥क्षेत्रमाहात्म्यकथनंश्रवणंचक्रुरुत्सुकाः
॥ततोविष्णुजनाःशैवाःकीर्तनंचक्रुरादृताः॥५५॥तन्मध्येमंडपःशौंडोनृत्यंगानंचकारह॥साधुवादेनमहता
पुनस्तैःसाधुसत्कृतः॥५६॥तस्यापिहिमनोब्रह्मन्शिवेमपिसमाहितं॥अथतृतीयेदिवसेमार्गएवसमंडपः॥
५७॥नृत्यन्गच्छतिगायन्सस्वयमेवशिवस्वरूपं॥पदेपदेदक्षिणतःक्षेत्रस्यममसद्द्विजः॥५८॥ब्रह्महत्यादि
पापानांप्रायश्चित्तंभवेद्यथा॥महादेवमहादेववासुदेवशिवेतिच॥५९॥स्मरन्नृत्यन्सभोक्ष्णंसस्तैरपिबहिःकृतः॥

पं॰मा॰ तृतीयेदिवसेगत्वानंदेहलिविनायकं॥६०॥पूजयामासुरव्यग्राःकाशीभक्तिविवृद्धये॥मंडपोलौल्यरहितः
११ शिवनामपरायणः॥६१॥बलादन्नमपित्यक्त्वाहरिकीर्तनतत्परः॥नाश्नातिनपिबत्यंभोनकस्यापिवशेस्थि
तः॥६२॥निर्द्वंद्वःसमदृक्शांतोबभूवागतसाध्वसः॥ब्राह्मणेनमयास्तैन्यंसुवर्णस्यकृतंरहः॥६३॥वंचित
श्चपितामान्योमातासाध्वीचवंचिता॥पापेनोपार्जितंवित्तंवेश्यावेश्मनितिष्ठति॥६४॥मनसाविप्रहननं
गमनंभर्तुरेवच॥संपन्नंचसुरापानंसाक्षाद्वेश्यागृहेणकिं॥६५॥आहारोमैथुनंनिद्रामिथ्यावादादयो
पिहि॥जाताममवराकस्यकथंपापपरिक्षयः॥६६॥अनुतापैःसुसंतप्तोमंडपोमंडवर्जितः॥क्षेत्रप्रदक्षिणं
कुर्वन्निःपापःसमपद्यत॥६७॥क्वचिद्रुदतिसंस्मृत्यसंस्मृत्यस्वाघसंचयं॥क्वचिद्वसतिक्षेत्रस्यप्रदक्षिणक्र
दित्यहं॥६८॥काशीकाशीतिकाशीतिशिवशंकरकेशव॥पाहिमांपतितंदीनंगुरुदेवापराधिनं॥६९॥रामेश्व
रंसमागम्यस्नात्वासंतर्प्यदेवताः॥रामेश्वरंसमभ्यर्च्यसोमनाथंतथार्च्यह॥७०॥रामंराजीवपत्राक्षंसीता रामः
लक्ष्मणसंयुतं॥नभुंक्तेनपिबत्यंभोनृत्यगीतादितत्परः॥७१॥प्रार्थ्यमानोपिगृण्हातिनकिंचिदपिखेद ११

कृतम्॥ततःप्रचलितताःसर्वेयात्रिणःशिवतत्पराः॥७२॥मंडपोपिस्मरन्काशींशिवंविष्णुंप्रतस्थिवान्॥
वृषभध्वजमा[illegible]त्यस्नात्वावैकापिलेह्रदे॥७३॥देवंसंपूज्यविधिवत्स्थित्वातत्रचपूर्ववत्॥तत्रःप्रभाते
वरुणासंगमेस्नानमाप्यच॥७४॥गताःसर्वेविश्वनाथंद्रष्टुंश्रीपार्वतीपतिं॥तत्रस्थित्वामहापूजांकृत्वा
सर्वेमहाजनाः॥७५॥अन्नानिवासोरत्नानिददुःशंकरतुष्टये॥मंडपोपितथाकृत्वामोक्षमंडपमध्यतः
॥७६॥साष्टांगंप्रणतःप्राहतत्रस्थोमध्यगोऽघकृत्॥मयापापानिसर्वाणिसुमहांतिबहूनिच॥७७॥कृता
नितत्रवदतनिष्कृतिंममसत्तमाः॥यथाहंपापनिर्मुक्तोभवामीहतदुच्यतां॥७८॥सदस्याऊचुः॥त्वंनिः
पापोसिभक्तोसिशिवयोःकेशवस्यच॥पंचक्रोशात्मकंलिंगंसत्संगाद्दक्षिणीकृतं॥७९॥मैत्रीवाणिज्य
मूल्याद्यैःकिंपुनःश्रवणादिभिः॥येनकेनापिसुमहत्पापंतस्यनविद्यते॥८०॥मंडपउवाच॥पित्रा
निष्कासितःसोहंकथंयास्यामितद्गृहं॥प्रतीतिकरणंकिंचिदस्तिचेद्ब्रूमनेमम॥८१॥शेषयंतुतदास
भ्याःशास्त्रप्रत्ययसंयुताः॥गर्हयंतिगृहस्थानोनोचेत्किंगमनेनमे॥८२॥सदस्याऊचुः॥आकार

पं.म. यस्त्वपितरं अस्मद्वचनगौरवात्॥ प्रतीतिं दर्शयामो वा दंडनाथस्य सन्निधौ॥ ८३॥ महादेव उवाच॥ अं
१२ उपोष्य गृहद्वारं गत्वा शिव शिवेति च॥ महादेव महादेवेत्युक्त्वा तूष्णीं व्यवस्थितः॥ ८४॥ कूष्मांडः प्राहृदपि
ता को निर्थिर्द्वारि वर्तते॥ पश्य पश्याशु सुभगे शिव वाक् शंकरप्रियः॥ ८५॥ सा भर्तुर्वचनाद्गत्वा दृष्ट्वा मंडप
मात्मजं॥ उवाच वचनं भीता भर्तुः पुत्रार्थमातुरा॥ ८६॥ अकृत्वैव च निर्वेशं कथमागमनं वद॥ मंडप उवाच
॥ आहूयंति सदस्यास्त्वां पितरं च ममानघ॥ ८७॥ निर्वेशवार्ता बहुला तत एव ब्रूयुरग्रतः॥ जननीं मंडपस्त
थ गत्वा कूष्मांडमब्रवीत्॥ ८८॥ पुत्रस्ते कृतनिर्वेशः शिवस्मरणतत्परः॥ द्वारि तिष्ठति सद्द्वेषोनातिथिः क
श्चनेतरः॥ ८९॥ कृतनिर्वेशमनघं श्रुत्वा पुत्रं तु स द्विजः॥ उत्थायागत्य सहसा ददर्श शिवरूपिणं॥ ९०॥
रुद्राक्षमालिनं शांतं विभूतिकृतभूषणं॥ उवाच किं समायातः शीघ्रं पुत्रं तथाघवान्॥ ९१॥ नहि स्वल्पे
न पुण्येन प्राप्यश्चितं महद्भवेत्॥ मंडप उवाच॥ मया बहूनि पापानि कृतानि विविधानि च॥ ९२॥ नत्राणं राम
तेन्य पापित्वा किमन्यैर्दूरसंस्थितैः॥ बलात्ता मा व्हयंत्येव सदस्याः शुद्धिदर्शिनः॥ ९३॥ पद्रोचते कुरु १२

तथात्वं मत्स्नेहेन मा व्रज॥ इति श्रुत्वा मंडपस्य वचः पत्न्या समन्वितः॥९४॥ मुक्तिमंडपिकां प्राप सदस्यैः
संस्थितां शुभां॥ नैराहूतो द्विजवरैर्धर्माधर्मार्थदर्शिकैः॥९५॥ उपाविशत्तमूचुस्ते पुत्रस्ते शुद्धिमागतः॥
कूष्मांड उवाच॥ प्रायश्चित्तेन केनासौ शुद्धिं प्राप्तो ममात्मजः॥९६॥ प्रतीतिर्मम वाक्यात्स्यादद्य दत्ते न तु भुज्यते
॥सदस्या ऊचुः॥ मुक्तिमंडपिकापास्तु स्वामी विष्णुर्न चापरः॥९७॥ स चेद्वदति वेदात्मा न दाशंका न
चोत्तरं॥ तत्पार्षदाभानुमुख्या वदिष्यंति च सत्तम॥९८॥ तदा मन्यस्व सुप्री तः शास्त्रैर्देवप्रसादतः॥
इत्युक्त्वा च सदस्यास्ते तुष्टुवुर्विष्णुमव्ययं॥९९॥ रविं ढुंढिं दंडपाणिं भैरवं चैव पंचमं॥ पंचापि तत्र सु
प्रीताः मुक्तिमंडपमध्यतः॥१००॥ प्रादुर्भूता महात्मानो लोकप्रत्ययकारकाः॥ विष्णुरुवाच॥ अयं शु
द्धो महापापो मंडपः साधुसंगतः॥१॥ काश्याः प्रदक्षिणं कृत्वाद्य चैपिला जगद्गुरुं॥ माहात्म्यश्रवणं जा
तं क्षेत्रस्याशुभनाशनं॥२॥ तस्मादयं गच्छतु स्वं गृहं पितृसमन्वितः॥ ढुंढिरुवाच॥ काशीति नाम ज
पतां शिवनामतुल्यं विघ्नादिपापनिचयो विलयं प्रयाति॥ किं तत्कथाश्रवणकीर्तनवासदानैः सम्यक्कृ

पं·मा प्रदक्षिणवतामशुभस्यनाशः॥३॥दंडपाणिरुवाच॥काश्यांपापंयेप्रकुर्वंतिपापास्तेषांदुःखंजाय
१३ तेवश्यमेव॥शंभोर्लिंगंसच्चिदाकाशरूपंपंचक्रोशंतत्परिक्रम्यशुद्धः॥४॥भैरवउवाच॥कोपंममैत
त्खलुपापिनांसदाकरोमिदंडंबहुधावश्यमेव॥प्रदक्षिणीकृत्यसमागतस्त्वयंकाशींविशुद्धोनविचा
रमस्मितत्॥५॥रविरुवाच॥सत्संगतःक्षेत्रसुदक्षिणीकृतंकाशीकथाश्रवणकीर्तनादयं॥शुभप्रदंपा
पहरंसुवासदंकृतंचशुद्धोमंडपःसत्यमेव॥६॥महादेवउवाच॥सभासदैर्देववरैरुक्तोकुष्मांडमंडपो॥
प्रदक्षिणीकृत्यतुतान्नमस्कृत्यपुनःपुनः॥७॥निःपापौहर्षसंपूर्णौययतुस्तौस्वमालयं॥प्रदक्षिणफलं
ब्रह्मन्पंचक्रोशात्मकस्यहि॥८॥लिंगस्यपञ्चयाप्रोक्तंसुगोप्यंपुरुषार्थदं॥श्रुत्वामाहात्म्यमतुलंपं
चक्रोशात्मकस्यच॥९॥लिंगस्यदक्षिणाकार्यात्वयाशिष्येणचानघ॥इतिश्रुत्वाप्रसन्नात्माजैगीष
व्योमहामुनिः॥१०॥देवंप्रदक्षिणीकृत्यनमस्कृत्यपुनःपुनः॥जगामपंचक्रोशस्ययात्रार्थंशिष्यसंयुतः रामः
॥११॥पंचभिर्दिवसैःकृत्वायात्रामत्रागतोमुनिः॥उपविष्टोविधिःसम्यक्यात्रायाःपापनाशनः॥१२॥ १३

मया पुण्यकृद्देवापि निर्विघ्नफलदायकः ॥ मुनिरागत्य विश्वेशं भवान्यासहितं तदा ॥ १३ ॥ पूजयामास विधिवदुपचारैः सुविस्तरैः ॥ शिष्यो गुरुप्रसादेन निःपापो पुण्यवान्सुधीः ॥ १४ ॥ जातः स्कंदप्रसादेन श्रुत्वा माहात्म्यमुत्तमं ॥ महादेव उवाच ॥ एतत्ते कथितं देव काश्यां पत्तनकं कृतं ॥ तस्य प्रणाशनं शुद्धं प्राप्स्यितं सुदुर्लभं ॥ १५ ॥ श्रुत्वाध्यायमिमं पुण्यं सर्वपापप्रणाशनं ॥ नरः शुद्धिमवाप्नोति काशीवासं च गर्भदहनं ॥ १६ ॥ इति श्रीब्रह्मवैवर्ते तृतीयविभागे पंचक्रोशीमाहात्म्ये तृतीयोध्यायः ॥ ३ ॥ ॥ ऋषय ऊचुः ॥ सूत सूत महाबुद्धे वदविद्याविशारद ॥ यथा प्रदक्षिणा कार्या मनुजैर्विधिपूर्वकं ॥ १ ॥ स्थानं वासस्तस्य वदनो भक्ष्यं चाभक्ष्यमेव च ॥ पूजां तस्मिन्स्थितानां च देवानां दानमेव च ॥ २ ॥ यथा संपूर्णतामेति यात्रा क्षेत्रस्य सत्तम ॥ सूत उवाच ॥ एवमेव पुरा पृष्टो भगवान् शिवया शिवः ॥ ३ ॥ तत्तद्ब्रवीमि मुनिश्रेष्ठाः शृण्वंतु विधिवन्मम ॥ श्रीदेव्युवाच ॥ भगवन्देवदेवेश प्रदक्षिणविधिं वद ॥ ४ ॥ पंचक्रोशस्य येनासौ निष्पापः पुण्यवान् भवेत् ॥ श्रीमहादेव उवाच ॥ आश्विनादिषु मासेषु त्रिषु पार्वति सत्तमे ॥ ५ ॥ प्रदक्षिणा प्रकर्तव्या सेत्रसा

पापकांक्षिभिः॥माघादिचतुरोमासाःप्रोक्तायात्राविधौनृणां॥६॥पूर्वस्मिन्दिवसेढुंढिंपूजयित्वाहवि
ष्यभुक्॥प्रातरुत्तरवाहिन्यांस्नात्वाविश्वेशमर्चयेत्॥७॥पुनर्यात्रार्थमपिचशिवयोःपूजनंभवेत्॥मु
क्तिमंडपिकायांचसंविश्यवरवर्णिनि॥८॥प्रतिज्ञांमहतींकृत्वापूजनंतत्रतत्रह॥काश्यांप्रज्ञानवाक्याप
सनोजनितमुक्तये॥९॥ज्ञाताज्ञातविमुक्त्यर्थंपातकेभ्योहितापच॥पंचक्रोशात्मकंलिंगंज्योतिरूपंसना
तनं॥१०॥भवानीशंकराभ्यांचलक्ष्मीश्रीशविराजितं॥ढुंढिराजादिगणपैःषट्पंचाशद्भिरावृतं॥११॥द्वा
दशादित्यसहितंनृसिंहैःकेशवैर्युतं॥कृष्णारामत्रययुतंकूर्ममत्स्यादिभिस्तथा॥१२॥अवतारैरनेकै
श्चयुतंविष्णोःशिवस्यच॥गौर्यादिशक्तिभिर्जुष्टंसेव्यंकुर्यात्प्रदक्षिणं॥१३॥बद्धांजलिःप्रार्थयीतमहादे
वंमहेश्वरीं॥पंचक्रोशस्ययात्रांवैकरिष्येविधिपूर्वकं॥१४॥प्रीत्यर्थंतवदेवेशसर्वाघौघप्रशांतये॥
इतिसंकल्प्यमौनेनप्रणिपत्यपुनःपुनः॥१५॥ढुंढिराजगणेशानमहाविघ्नौघनाशनः पंचक्रोशस्ययात्रा
र्थंदेह्याज्ञांकृपयाविभो॥१६॥विश्वेशंत्रिःपरिक्रम्यदंडवत्प्रणिपत्यच॥मोदंप्रमोदंसुमुखंदुर्मुखंग

पं मा० त्वाकर्दमेशं पंचक्रोशीहितिलैर्नमेत्॥ आदौ कर्दमतीर्थं तु स्नानं कूपावलोकनं॥ २९॥ सोमनाथं विरूपाक्षं नी
१५ लकंठं ततोर्चयेत्॥ तत्र वासं विधायाग्नौ किंचिद्धोमं द्विजार्चनं॥ ३०॥ श्राद्धादिविधिकृत्यानि कृत्वा मुच्येत
ऋणत्रयात्॥ कर्दमेश महादेव काशीवासजनप्रिय॥ ३१॥ त्वत्पूजनान्महादेव पुनर्दर्शनमस्तु ते॥ प्रातः
स्नात्वा पूजयित्वा समर्च्य च द्विजानपि॥ ३२॥ नागनाथं च चामुंडां मोक्षेशं करुणेश्वरं॥ वीरभद्रं ततो दुर्गां
विकटाख्यां प्रपूजयेत्॥ ३३॥ उन्मत्तभैरवं नीलं कालकूटं ततोर्चयेत्॥ दुर्गां च विमलां नत्वा महादेवं त
तो व्रजेत्॥ ३४॥ नंदिकेशं भृंगिरीटिं तत्रैव च गणप्रियं॥ विरूपाक्षं च यक्षेशं विमलेश्वरमेव च॥ ३५॥ मो
क्षदं ज्ञानदं चैवाऽमृतेशं तत्र पूजयेत्॥ गंधर्वसागरं तीर्त्वा भीमचंडीं ततो व्रजेत्॥ ३६॥ तत्र स्नात्वा भीमचंडीं
पयसा स्नापयेत्सुधीः॥ पंचोपचारैः संपूज्य ब्राह्मणान् परितोषयेत्॥ ३७॥ तत्र वासं प्रयत्नेन कुर्याच्चंडविना
यकं॥ रविरक्ताक्षगंधर्वनरकार्णवतारकं॥ ३८॥ शिवं प्रपूज्य यत्नेन रात्रौ पूर्ववदाचरेत्॥ प्रातरुत्थाय सु ग म
स्नातः प्रार्थयेद्भीमचंडिकां॥ ३९॥ भीमचंडि प्रचंडानि मम विघ्नानि नाशय॥ नमस्तेस्तु गमिष्यामि पुनर्दर्शन १५

णनायकं॥१७॥ प्रणम्य पूजयित्वा दौ दंडपाणिं ततोर्चयेत्॥ कालराजं च पुरतो विश्वेशास्य जग
द्गुरोः॥१८॥ पूजयित्वा ततो गच्छेन्मणिकर्णीं विधानतः॥ तत्र स्नात्वा महादेवं मणिकर्णीशमर्चये
त्॥१९॥ विनायकं सिद्धिसंज्ञं पुनरागत्य पूजयेत्॥ मणिकर्णीतटे गत्वा गंगाकेशवमच्युत॥२०॥ ल
लितां च ततः पूज्य जरासंधेश्वरं विभुं॥ सोमनाथं ततः पूज्य दालभ्येश्वरमेव च॥२१॥ शूलटंकेश्वरं लिं
गं वाराहं पूज्य च व्रजेत्॥ दशाश्वमेधलिंगं च बंदीं नत्वैव पूजयेत्॥२२॥ सर्वेश्वरं च केदारं ततो हनुम
दीश्वरं॥ संगमेशं ततः पूज्य लोलार्कं पूजयेत्ततः॥२३॥ अर्कसंज्ञं गणाध्यक्षं असेस्तीरे पुनर्व्रजेत्॥ क्षे
त्र प्रदक्षिणां कुर्वन् तिलमात्रं न संत्यजेत्॥२४॥ दुर्गाकुंडे नरः स्नात्वा यजेद्दुर्गविनायकं॥ दुर्गां संपूज्य वि
धिवत् वसेत्तत्र सुखाप्तये॥२५॥ ब्राह्मणान् भोजयेत्तत्र मधुपायसलड्डुकैः॥ रात्रौ जागरणं तत्र पुराण
श्रवणादिकं॥२६॥ कुर्याच्च कीर्त्तनं भक्त्या परोपकरणादि च॥ जय दुर्गे महादुर्गे जय काशीनिवासिनि
॥२७॥ क्षेत्रविघ्नहरे देवि पुनर्दर्शनमस्तु ते॥ इति दुर्गां प्रार्थयित्वा विघ्नकूसेनेश्वरं ततः॥२८॥ पूजयि

मस्तुते॥४०॥ततोगच्छेदेकपादंगणंनत्वाथतंडुलान्॥तिलांश्चविकिरेत्तत्रधनधान्यादिसंपद४१ततोग
च्छेन्महाभीमंभैरवंभैरवींशुभां॥भूतनाथंचसोमेशंप्रपूज्यसिंधुरोधसि॥४२॥कालनाथंकपर्दीशंकामेशं
चगणेश्वरं॥वीरभद्रंचारुमुखंगणनाथंप्रपूजयेत्॥४३॥ततोगच्छेद्देहलीशंविघ्नपूगनिवारणं॥मोद
कैः२थुकैर्लाजैःसक्तुमिश्रैस्तुपर्वभिः॥४४॥पूजयेच्छुद्धपादेवंतंदेहलिविनायकं॥तत्पार्श्वेषोडशापुन
र्विघ्ननाथान्समर्चयेत्॥४५॥उद्दंडगणपंपूज्यउत्कलेश्वरमेवच॥रुद्राण्यास्तुततोभूमिंदृष्ट्वारामेश्वरंव्र
जेत्॥४६॥वरुणापांततःस्नात्वातर्पणादिविधानतः॥रामेश्वरंश्वेततिलैर्विल्वपत्रादिभिर्यजेत्॥४७॥
सोमनाथंतुतत्रैवपूजयेद्दिंद्रदिग्गतं॥भरतेशंलक्ष्मणेशंशत्रुघ्नेश्वरमेवच॥४८॥द्यावाभूमिश्वरंतत्रपू
जयेन्नहुषेश्वरं॥तत्रवासंप्रकल्प्याथपूर्ववज्जागरादिकं४९कृत्वास्नात्वाथरामेशंपूजयेत्काशिवासदं॥श्रीरा
मेश्वररामेणपूजितस्त्वंसनातन॥५०॥आज्ञांदेहिमहादेवपुनर्दर्शनमस्तुते॥लिंगानिसुबहून्यादौवरणा
पारगान्यथ॥५१॥पूजयित्वाततोगच्छेद्देवसंघनिषेवितं॥देवसंघेश्वरंकिंचिद्दत्वास्थित्वाततोव्रजेत्॥

पं·मा· ।।५२।।पाशपाणिंगणेशंचक्षेत्रमध्येव्यवस्थितं।।पूजयित्वाबहिश्चैवदृष्ट्वेश्वरमयोव्रजेत्।।५३।।एकोश्व
१६ मेधःश्वनाकृतःक्षेत्राद्बहिःपुरा।।स्वर्गभूमिस्तुसाज्ञेयामोक्षभूमिस्तुमध्यतः।।५४।।काश्याश्चतुर्दिशंदेवि
योजनस्वर्गभूमिका।।मृतास्तत्रहिगच्छंतिस्वर्गंसुकृतिनांपदं।।५५।।ततस्तुयूपंहिसरःपृष्ट्वागच्छेच्छनैः
शनैः।।महाक्षेत्रंकापिलंतुयत्रश्रीवृषभध्वजः।।५६।।तत्रस्नात्वाविधानेनतर्पयित्वापितृनथ।।श्राद्धंविधाय
सुश्रद्धःपूजयेद्वृषभध्वजं।।५७।।निवसेत्तंतुदिवसंपुराणादिप्रकल्पयेत्।।प्रदक्षिणीकृत्यततोगच्छेज्ज्वाला
नृसिंहकं।।५८।।एवंप्रदक्षिणीकृत्यसरःकापिलमुत्तमं।।वरुणांचततस्तीर्त्वास्नात्वावैसंगमेशुभे।।५९।।
आदिकेशवमभ्यर्च्यसंगमेश्वरमेवच।।विनायकंखर्वसंस्थंपूजयित्वाततोव्रजेत्।।६०।।क्रोडीकृत्ययवान्
मुष्टान्विकिरन्विष्णुमुच्चरन्।।प्रल्हादेश्वरमभ्यर्च्यत्रिलोचनमतःपरं।।६१।।बिंदुमाधवमभ्यर्च्यह्रदे
पंचनदेशुभे।।गभस्तीशंमंगलांचगौरींदृष्ट्वाततोव्रजेत्।।६२।।वसिष्ठवामदेवौचपर्वतेश्वरमेवच।।महे राम:
श्वरंसमभ्यर्च्यततःसिद्धिविनायकं।।६३।।सप्तावरणगान्दिव्यान्पूजयेद्गणनायकान्।।मणिकर्ण्यांततः १६

स्नात्वागच्छेद्दिश्वेश्वरंयमी॥६४॥नमस्कृत्यमहेशानंप्रविशेद्देवसन्निधौ॥पंचोपचारैःसंपूज्यस्तुत्वान
त्वापुनःपुनः॥६५॥मुक्तिमंडपमागत्यकृतार्थस्तत्रसंविशेत्॥विष्णुंचदंडपाणिंचढुंढिंभैरवमेवच॥६६॥आ
दित्यंपंचगणपान्पूजयेत्पुनरेवच॥प्रदक्षिणीकृतान्देवान्स्मरेत्तत्रक्रमात्सुधीः॥६७॥जयविश्वेशविश्वा
त्मन्काशीनाथजगद्गुरो॥त्वत्प्रसादान्महादेवकृताक्षेत्रप्रदक्षिणा॥६८॥अनेकजन्मपापानिकृतानिमम
शंकर॥गतानिपंचक्रोशात्मलिंगस्यप्रदक्षिणात्॥६९॥त्वद्भक्तिःकाशिवासश्चरहितापापकर्मणा॥
सत्संगश्रवणाद्यैश्चकालोगच्छतुनःसदा॥७०॥हरशंभोमहादेवसर्वज्ञसुखदायक॥प्रायश्चित्तंसुनिर्दि
ष्टंपापानांत्वत्प्रसादतः॥७१॥पुनःपापमतिर्मास्तुधर्मबुद्धिःसदास्तुमे॥इतिजप्त्वायथाशक्त्यादत्वादानंद्वि
जन्मनां॥७२॥बध्वाकरयुगंयात्रीमंत्रमेतमुदीरयेत्॥पंचक्रोशस्ययात्रेयंयथावद्यामयाकृता॥७३॥न्यू
नंसंपूर्णतांयातुत्वत्प्रसादादुमापते॥इतिप्रार्थ्यमहादेवंगच्छेद्गेहंस्वकंस्वकं॥७४॥न्यूनातिरिक्तदोषाणांपरि
हारायदक्षिणां॥संकल्प्यागत्यचगृहंब्राह्मणान्भोजयेत्ततः॥७५॥ततआगत्यचगृहेकुटुंबैःसहभो

पं॰मा॰ जनं॥कृत्वात्मानंततोध्यात्वाकृतकृत्योभवेत्ततः॥७६॥एकरात्रंतुमध्येयःप्रवशेच्छुचिमानसः॥वरुणा
१७ यास्तटेरम्येसयातिपरमांगतिं॥७७॥द्विरात्रिंवसतिंमध्येयःकुर्याद्धर्मतत्परः॥प्रथमंचंडिकाक्षेत्रेद्वितीयंव
रुणातटे॥७८॥दिवसंतुवसेद्धीमान्ततोविश्वेश्वरंव्रजेत्॥यस्तुत्रिरात्रमुषितोमध्येभवतिपार्वति॥७९॥
दुर्गास्थलेभीमचंड्यांरामेशेवासमृच्छति॥वसतिंयस्तुकुरुतेमध्येदिनचतुष्टयं॥८०॥प्रथमांवसतिंकुर्या
त्कर्दमेश्वरसन्निधौ॥द्वितीयांभीमचंड्यांतुरामेशंतुतृतीयकं॥८१॥चतुर्थींकापिलेक्षेत्रेवसतिंप्रतिकल्पये
त्॥राजवृद्धकुमाराणांयथेष्टंवासमिष्यते॥८२॥यथाकथंचिद्देवेशिपंचक्रोशप्रदक्षिणं॥कुर्याद्देवनमास्ता
द्विचिंतयेद्धर्मकोविदः॥८३॥सएवशुभदःकालोयत्रश्रद्धोदयोभवेत्॥श्रद्धाहिदुर्लभालोकेकलौखलु
विशेषतः॥८४॥श्रद्धैवतीर्थेदेवाश्चश्रद्धास्वर्गापवर्गदौ॥श्रद्धयायत्कृतंसर्वमनंतफलदंभवेत्॥८५॥
सत्येश्रद्धागुणवतीनासत्येसाफलप्रदा॥काश्यांवसतियोनित्यंस्नातिभागीरथीजले॥८६॥कुर्यात्स्वांव रामः
त्सरींयात्रांपंचक्रोशस्यसुंदरि॥सब्रह्मभूतोनिवसन्मामनुग्रहतःसुखी॥८७॥इतिश्रीब्रह्मवैवर्तेपंच १७

काशीमाहात्म्ये चतुर्थोध्यायः॥४॥ ॥देव्युवाच॥क्षेत्रप्रदक्षिणेदेवनियमाःकेभवंतिनान्॥वदस्वनारि
ताशेषविश्वनाथकृपालय॥१॥महादेवउवाच॥प्रतिग्रहंपरान्नंचपरदाराभिभाषणं॥परस्वग्रहणंस्नेहा
द्रसद्वार्त्तांचवर्जयेत्॥२॥असतांपापिनांसंगंनकुर्यात्प्रयतोनरः॥ असत्समागमात्सर्वंनिष्फलंजायतेनृ
णां॥३॥ममद्रोह्नूपरैःसाकंनव्रजेद्विष्णुनिंदकैः॥परापवादंनोकुर्यात्परद्रोहंचवर्जयेत्॥४॥गुरुनिंदां
शास्त्रनिंदांशिवधर्ममहात्मनां॥तीर्थलिंगतपोनिंदांनकुर्यात्तुप्रदक्षिणी॥५॥अन्यदातुकृतंपापंन
श्येत्क्षेत्रप्रदक्षिणात्॥पापंप्रदक्षिणामध्येकृतंकेनप्रणश्यते॥६॥ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चै
वांत्यजातिभिः॥कांक्षिभिःपरमंतत्वंकर्त्तव्यंक्षेत्रदक्षिणं॥७॥किंचिद्दानंनप्रत्यहंब्राह्मणेभ्योदेयंदीनाना
थपंग्वंधकेषु॥भूमौशय्यातैलमांसादिदुष्टंसर्वंवर्ज्यंतीर्थयात्रादिनेषु॥८॥स्नानद्वयंप्रकुर्वीतनित्यश्रा
द्धंचसुंदरि॥यदत्रकिंचित्क्रियतेकोटिकोटिगुणंभवेत्॥९॥ब्रह्मचारीगृहस्थोवावानप्रस्थोथमस्करी॥
क्षेत्रेवसन्बहिर्वापिकुर्याद्देवप्रदक्षिणं॥१०॥ब्रह्महत्यादिपापानांप्रायश्चित्तंनचापरं॥बहिःकृतानां

पं·मा· पापानां मध्ये वापि सुरेश्वरि॥११॥ प्रायश्चित्तांतरं पुंसो न दृष्टं न मया श्रुतं॥ वसंति देवा बहवः स्वर्गभूमौ न
१८ हिः सदा॥१२॥ मदाज्ञां पालयंतस्ते ववासार्थं दैन्यमागताः॥ बहिस्थिताः प्रकुर्वंति दक्षिणं क्षेत्रलब्धये॥१३॥
ममानुग्रहमासाद्य प्रविशंति हि काशिकां॥ मदनुग्रहकामैश्च पंचक्रोशात्मकं प्रिये॥१४॥ लिंगप्रदक्षिणी कु
र्याद्दृष्टोऽहं कृपानिधिः॥ अस्मिन्क्षेत्रे महादेवि पुण्यं पुण्यतरं तु वा॥१५॥ अनंतकोटिगुणितं भवत्येव न सं
शयः॥ अंतर्गृहे कृतं पापकेवलं यातनावहं॥१६॥ अन्यक्षेत्रे कृतं पापं पुण्यक्षेत्रे विनश्यति॥ पुण्यक्षेत्रे कृ
तं पापं गंगातीरे विनश्यति॥१७॥ गंगातीरे कृतं पापं वाराणस्यां विनश्यति॥ वाराणस्यां कृतं पापमंतर्गृहे
विनश्यति॥१८॥ अंतर्गृहे कृतं पापं वज्रलेपो भविष्यति॥ वज्रलेपच्छिदं ह्येतत्पंचक्रोशप्रदक्षिणं॥१९॥
तस्मात्सर्वप्रयत्नेन कुर्यात्क्षेत्रप्रदक्षिणं॥ वाराणसीं तु संप्राप्य प्रमादाद्यो बहिर्गतः॥२०॥ दैवात्स पुनराग
त्य दक्षिणेन प्रशुद्ध्यति॥ अविमुक्तं महाक्षेत्रं सर्वदा जननी यथा॥२१॥ पुत्रस्य जननी लोके सर्वथा हि रामः
तकारिणी॥ हितकृत्सर्वजंतूनां काशी ह्यत्र सर्वदा॥२२॥ देव्युवाच॥ भगवन्सर्वभूतेश कृपापूरित १८

विग्रह॥कृतार्थानांवददिभोक्षेत्रसंन्यासिनामपि॥२३॥प्रदक्षिणक्रमंक्षेत्राद्दहिर्वामध्यगोपिवा॥नि
यमस्यनभंगःस्याद्यथापापंचनश्यति॥२४॥देहिनांपापसंबंधःसर्वथाजायतेक्रमात्॥तत्काशिवास
जंनश्येत्क्षेत्रसंन्यासिनांयथा॥२५॥श्रीभगवानुवाच॥सम्यक्पृष्टंत्वयादेविमहाहंकारनाशनं॥प्रायश्चि
त्तंन्यासिनांहिक्षेत्राधौघविनाशनं॥२६॥विधिस्तुपूर्वमेवोक्तोनियमादिपुनस्तव॥प्रदक्षिणाक्रमंतेयामव
धारयसुव्रते॥२७॥स्नात्वादेवंसमभ्यर्च्यविश्वेशंविश्वयासह॥मोदादिपंचकंढुंढिंदंडपाणिंचभैरवं॥२८
॥पूर्ववत्तीरगान्पूज्यदुर्गांपूज्यचयत्नतः॥बहिरावरणांयत्कागणेशानांचसप्तमं॥२९॥मध्येप्रदक्षिणंकु
र्यादक्षिवरुणयोःकृती॥सन्मुखीभूयविधिवत्पूज्यायेवामनस्थिताः॥३०॥देवादेव्यश्चफलदाःक्षेत्रपा
लाःप्रयत्नतः॥एकरात्रंद्विरात्रंवावसेन्मध्येत्रिरात्रकं॥३१॥यत्रश्रद्धासुमहतीवसेत्तत्रनसंशयः॥प्र
त्यहंदंडपाणेस्तुपूजाकार्याप्रयत्नतः॥३२॥दंडपाणेःपूजनेनसिद्धाभवतिनान्यथा॥दंडपाणेयक्षपते
क्षेत्रसन्यासिवल्लभ॥३३॥पंचक्रोशस्ययात्रेयंसिद्धास्मेत्वत्प्रसादतः॥अनेनश्लोकमंत्रेणप्रार्थनापूजनं

पं॰ मा॰ स्मरनं॥ ३४॥ प्रत्यहं कुर्वता यात्रां संपूर्णा भवति ध्रुवं॥ आगत्य विश्वनाथस्य पूजा कार्या तु पूर्वेवत्॥ ३५॥ देव्यु
१९ वाच॥ प्रत्यहं दंडपाणेस्तु पूजा प्रोक्ता विशेषतः॥ किमेतद्द्देवेश यात्रामुद्दिश्य शंकर॥ ३६॥ महादेव उवा
च॥ काशीं प्राप्य बहिर्नैव गच्छेत्सर्वात्मना क्वचित्॥ मन्मुखात्सम्यगाश्रुत्य क्षेत्रसंन्यासकृन्नरः॥ ३७॥ दंडपा
णिः सभवत्तदारभ्य वरानने॥ पुनः कालांतरे देवि ऋषिभिर्नारदादिभिः॥ ३८॥ एष्टोहं क्षेत्रजनितपापना
शनमुत्तमं॥ सदासुदुर्लभं देवि प्राप्यश्चित्तं तदा महत्॥ ३९॥ उपदिष्टं महालिंगप्रदक्षिणमशेषतः॥ तच्छ्रु
त्वा दृष्टवान् दंडपाणिः क्षेत्रपरायणः॥ ४०॥ तदा मयोपदिष्टो सौ महापाशुपतव्रती॥ क्षेत्रयात्रा द्विती
येयं मयोक्ता दंडपाणये॥ ४१॥ अतो दंडपतेः पूजा कर्तव्या पूर्तिकारिणी॥ पंचक्रोशात्मकस्यैव लिंग
स्य परमात्मनः॥ ४२॥ प्रदक्षिणमिदं कृत्वा जीवन्मुक्तो भवेन्नरः॥ देव्युवाच॥ ज्ञात्वापि श्रद्धया देव न कु
र्वंति प्रदक्षिणं॥ ४३॥ तत्केन हेतुना मर्त्या उपेक्षंते महाफलं॥ महादेव उवाच॥ श्रद्धापुण्यवतां देवि न रामः
पांडित्यादिभिरस्य सा॥ ४४॥ तस्माद्धर्मे प्रयत्नानां सिध्येत्सर्वं न चान्यतः॥ यत्र यत्र परित्यज्यते जनस्तत्र त १९

त्वसुखमेधतेपुनः॥४५॥साधनानिविदधातितत्परोयेनतत्फलमवाप्नुयान्नरः॥लौकिकेपरमवैदिकेथ
वापामरःपरमतत्त्ववित्तथा॥४६॥मादकःपरममोदकोयथादीयतेकपटभार्ययायथा॥मोहितोनचवि
चारयत्ययंजीवनंमरणमप्यहोवशी॥४७॥एवमेकंकालकूटंइंद्रियंसर्वनाशकृत्॥तदेवशोधितंयद्वद्धि
समप्यमृतंभवेत्॥४८॥जगत्तृणीकृत्यसकालमत्तुंआत्मानमाप्नोत्यशिवेनयोगैः॥अविघ्नमेवंस्वमलं
विसृज्यशरीरसंज्ञंमलखंडभांडं॥४९॥मुक्तोभवेदेषनचान्यथैवमर्त्यःप्रसादान्ममचैवमुक्तः॥कःकर्तुमेवं
प्रभवत्यविघ्नंकलौमनुष्योबहुदोषयुक्तः॥५०॥अथापिमद्भक्तियुतोविमुक्तस्त्वद्भक्तियुक्तःसकलैश्चभा
वैः॥पूर्वोदितादप्यतिदुःशकोयंविमोहनार्थैरखिलैश्चशास्त्रैः॥५१॥बीभत्सितेदुर्विषयेकदाचिद्यो॥
वानुरागोभवितानरस्य॥सचेद्भविष्यत्परमात्मनीशेकोनाममुक्तोनभवेद्भवाब्धेः॥५२॥अविमुक्तंमम
क्षेत्रंअविमुक्तेश्वरंशिवं॥अविमुक्तजनंशांतंसेवंतेयेधृतव्रताः॥५३॥विमुक्ताःपरमानंदेपदेस्थितिमु
पागताः॥अनेकजन्मसुमहत्साधनैर्ज्ञानमुत्तमं॥५४॥प्राप्नुवंतिनतेकेनजन्मनासाधुवासिनः॥ ॥

अष्टांगादिभिरन्यैश्च तपोयज्ञादिभिः सदा॥५५॥ साधिते याःसिकी सिद्धिरविमुक्ते निरर्गला॥ अविमुक्ता
त्परो योगो ज्ञानं दानं जपस्तपः॥५६॥ क्षेत्रतीर्थादिनियमान संतिशुभदर्शिनां॥ अविमुक्तं समासाद्य न
त्यजेन्मोक्षकामुकः॥५७॥ क्षेत्रन्यासदृढं कृत्वा वसेद्धर्मपरः सदा॥ क्षेत्रन्यासपराणांतु महमप्यनुकूलजैः
॥५८॥ भोगैः सहापनां यातो दिशावः परमांगतिं॥ यथा पतिव्रता नारी भर्तारमनुगच्छति॥५९॥ तथा स
ह समालंव्य काशीमनुगतो भवेत्॥ गुरुद्रोहपरो यस्तु विप्रद्रोहपरस्तथा॥६०॥ न तस्य काशी सिध्येत
वहुभिः साधनैर्युता॥ क्षेत्रसन्यासिनामेवं क्रमः प्रोक्तो मयानघ॥६१॥ प्रदक्षिणायास्तु महान्महापा
पहरः परः॥६२॥ इतिश्रीब्रह्मवैवर्ते महापुराणे तृतीयविभागे पंचक्रोशीमहिमावर्णनं नाम पंचमो
ध्यायः॥५॥ समाप्तः॥ ६ ॥ छ ॥ ॰ ॥ ॐ ॥

श्रीकाशीविश्वनाथपुरीमेंमहल्लाछोटकीपिअरीपरबाबूकौलेश्वरसिंहकेमकानमेंबाबूकिसु
नदयालसिंहकेगनेसप्रभाकरछापाखानेमे श्रीपंचक्रोशीमाहात्म्य छापागयाजिस्कोलेनाहो
यसोनईसडकपरबाबूकौलेश्वरसिंहकेदुकानपरमिलैगा सोधावालशास्त्रीप्रभुणेनेबहुत
शुद्ध॥ सम्वत् १९४३॥मार्ग०शु०४

इतिश्रीपञ्चक्रोशीमाहात्म्यंसमाप्तम्